# २. आदर्शगुणाः ।

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. रामः कस्मिन् वंशे जातः? (K)
2. शत्रुनिबर्हणः कः ? (K)
3. त्यागे रामः केन समः? (K)
4. रामः कान् स्वजनवत् पश्यति? (K)
5. रामः कान् अविजित्य सङ्ग्रामात् न निवर्तते ? (K)
6. वासवः केषां राजा? (K)
7. रामः केषु विशारदः आसीत् ? (K)
8. रामः केन सह सङ्ग्रामं व्रजति ? (K)

**II दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. श्रीरामस्य गुणान् सङ्गृह्य लिखत । (A)

**III मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. धर्मज्ञः सत्यसन्धश्च ........ च हिते रतः । (S)
2. सङ्ग्रामात् पुनरागत्य कुञ्जरेण...........वा । (S)
3. रामो विग्रहवान् ..............। (S)
4. .............. स्वस्य धर्मस्य। (S)
5. रामो .............. शौर्यवीर्यपराक्रमैः। (S)

( रथेन, धर्मः, प्रजानाम् लोकाभिरामोऽयम्, रक्षिता )

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टश्लोकानाम् अनुवादं कन्नड -आङ्ग्लभाषया वा कुरुत ।**

1. धर्मज्ञः सत्यसन्धश्च प्रजानां च हिते रतः ।
   यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् । (C)

2. रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ।। (C)

3. सर्वशास्त्रार्थतत्त्वज्ञः स्मृतिवान् प्रतिभानवान् ।
सर्वलोकप्रियः साधुरदीनात्मा विचक्षणः ।। (C)

4. प्रजासुखत्वे चन्द्रस्य वसुधायाः क्षमागुणैः ।
बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ।। (C)

5. मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ।
प्रियवादी च भूतानां सत्यवादी च राघवः ।। (C)

6. स्मितपूर्वाभिभाषी च धर्मं सर्वात्मना श्रितः ।
सम्यग्योक्ता श्रेयसां च न विगृह्य कथारुचिः ।। (C)

7. रामो विग्रहवान् धर्मः साधुः सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानामिव वासवः ।। (C)

**V रेखाङ्किंतानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. रामः <u>धनुर्वेदे</u> निष्ठितः । (S)

2. रामः <u>प्रजानां</u> हिते रतः । (S)

******************